# Aksharadhamavarnanam

# અક્ષરધામવર્ણનમ્

## Document Information

Text title : Aksharadhamavarnanam

File name : akSharadhAmavarNanam.itx

Category : deities_misc, svAminArAyaNa, gurudev

Location : doc_deities_misc

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# અક્ષરધામવર્ણનમ્

સર્વોપરિ હ્યખિલધામવિભૂષણં સચ્
ચિત્ સૌખ્યદં નિખિલવેદશિરઃ પ્રગીતમ્ ।
લક્ષ્યાયુતં પરમયામૃતનામધેયં
ધામાક્ષરં લસતિ તદ્ વૃષજાઙ્ગકાન્તિ ॥ ૧॥

યન્નિર્ગુણં સકલવિશ્વગણાત્મકં ચ
નિત્યં નિરઞ્જનમશોકમનાદ્યનન્તમ્ ।
સત્યં સનાતનમલૌકિકમેવ પૂર્ણં
ધામાક્ષરં લસતિ તદ્ વૃષજાઙ્ગકાન્તિ ॥ ૨॥

નિત્યં યદેકકિરણેઽક્ષરકોટિમુખ્યાઃ
સાતત્યતશ્ચ પરમાણુવદુડ્ડયન્તે ।
દિવ્યં સદાભયમનેકગુણાકરં ચ
ધામાક્ષરં લસતિ તદ્ વૃષજાઙ્ગકાન્તિ ॥ ૩॥

યત્કાન્તિતશ્ચ સતતં પરિભાતિ સમ્યક્
સૂર્યાગ્નિચન્દ્રભગણાદિ સમગ્રવિશ્વમ્ ।
તેજોમયં હિ સુખબોધ્યસુલક્ષણઞ્ચ
ધામાક્ષરં લસતિ તદ્ વૃષજાઙ્ગકાન્તિ ॥ ૪॥

ખને ભેની અન્તિથી સૂર્ય, અગ્નિ, યન્દ્ર, નક્ષત્રનો સમૂહ
યસ્યૈવ દિવ્યપરિપૂર્ણસુખાગ્રતસ્તુ
લોકાન્તરાણિ રુચિરાણ્યપિ સર્વશો હિ ।
નૂનં વ્રજન્તિ નિરયોપમતાં સદૈવ
ધામાક્ષરં લસતિ તદ્ વૃષાઙ્ગકાન્તિ ॥ ૫॥

દિવ્યાતિચિત્રવિભવપ્રકરૈરુપેતં
દિવ્યાદ્ભુતાપરિમિતોત્તમશક્તિયુક્તમ્ ।
ભાસ્વત્સ્વરૂપમખિલાન્વયમિ

ધામાક્ષરં લસતિ તદ્ વૃષજાઙ્ગકાન્તિ ॥ ૬॥

યચ્ચાત્ર ધર્મપ્રમુખાઙ્ગયુજૈવ ભક્ત્યા
શ્રીધાર્મિકસ્ય કરુણાર્દ્રહૃદઃ પ્રસાદાત્ ।
સમ્પ્રાપ્યતે કિલ જનૈઃ સુખદં ન ચાન્યૈ-
ર્ધામાક્ષરં લસતિ તદ્ વૃષજાઙ્ગકાન્તિ ॥ ૭॥

ઐશ્વર્યશક્તિનિકરં રુચિરઞ્ચ સર્વા-
ધારઞ્ચ ચિત્રમખિલાદ્ભુતભૂરિશોભિ ।
કાન્તં નિતાન્તમનવદ્યમચિન્ત્યમેવ
ધામાક્ષરં લસતિ તદ્ વૃષજાઙ્ગકાન્તિ ॥ ૮॥

ઇતિ શ્રીસ્વામિનારાયણબાપાચરિત્રામૃતસાગરે પ્રથમપ્રવાહે
દ્વિતીયે તરઙ્ગે-અક્ષરધામવર્ણનં સમ્પૂર્ણમ્ ।

*Aksharadhamavarnanam*
pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*